Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 6 | ISSN : 2582-0095

# पुराणेषुवास्तुशास्त्रदृष्ट्यादेवालयवास्तुविचारः

किसल कुमार झा
शोधच्छात्रः, ज्योतिषविभागः, संस्कृतविद्याधर्मसंकायः, काशीहिन्दूविश्वविद्यालयः।

**Article Info**
Volume 5, Issue 6
Page Number : 154-160
**Publication Issue :**
November-December-2022
**Article History**
Accepted : 01 Dec 2022
Published : 20 Dec 2022

**शोधसारांशः–** पुराणेषु देवालय वास्तु विषयकं पर्याप्त विवेचनं कृतं वर्तते। देवालय वास्तु विवेचनम् यथा विस्तरेण गरुण पुराणे कृतं वर्तते तथैव अग्निपुराणे तथा मत्स्य पुराणे तदपेक्षया किञ्चित् संक्षेपेनैव वर्णनं प्राप्यते। प्रासाद विषये तस्य सांगोपांगलक्षणं ज्ञात्वा शिल्पशास्त्र प्रमाणेन तथा शिल्पवेदिनां मार्गदर्शनेन प्रासादादीनां निर्माणं कुर्युः।

**मुख्यशब्दाः** –पुराणः, वास्तुशास्त्रः, देवालयः, शिल्पशस्त्रः, राजभवनम्।

पुराणेषु देवालय वास्तु विषयकं पर्याप्त विवेचनं कृतं वर्तते। देवालय वास्तु विवेचनम् यथा विस्तरेण गरुण पुराणे कृतं वर्तते तथैव अग्निपुराणे तथा मत्स्य पुराणे तदपेक्षया किञ्चित् संक्षेपेनैव वर्णनं प्राप्यते। प्रासाद विषये तस्य सांगोपांगलक्षणं ज्ञात्वा शिल्पशास्त्र प्रमाणेन तथा शिल्पवेदिनां मार्गदर्शनेन प्रासादादीनां निर्माणं कुर्युः। कल्याणकलिकायं प्रासाद लक्षणाध्याये वर्णितंमिदं पद्मं प्रासादांग कलापस्य महत्वं निरूपयति

**"प्रासादलक्षणं सांगोपांगमू ज्ञात्वा सविस्तरम्।**
**प्रासादं कारयेत् शिल्पवेदिना मार्गवेदिना।।**
**हस्तलक्ष्मस्वस्तिकादि वास्तु पद विवेचनम्।**
**आयाद्यंगविचारं च विधाय प्रथमं ततः।**
**प्रासादंगकलापस्य निरूपण पुरस्सरम्।**
**प्रासादामण्डपोपेता निरूप्यन्ते सुलक्षणाः।।"**[1]

पुराणेषु प्रासाद (देवालय) शब्दस्य विवरणं राजभवनेषु तथा देवमन्दिरेषु पर्यन्तं अर्थोद्घाटयति। राजप्रासाद नृपति प्रासाद पर्यन्तमेव न केवलं अर्थोद्घाटनं करोति अपितु देवमन्दिर (देवालय) निर्माणस्य समग्र प्रक्रियां वर्णयति।

उक्तञ्च गरूण पुराणे–

**प्रासादानां लक्षणञ्चवक्ष्ये शौनक तच्छृणु।**
**चतुः षष्ठिपदं कृत्वा दिग्विदिश्रूपलक्षितम्।।**
**चतुष्कोणं चतुर्भिश्च द्वाराणि सूर्य संख्यया।**
**चत्वारिंशाष्टभिश्चौव भित्तीनां कल्पना भवेत्।।**
**ऊर्ध्वक्षेत्र समाजंघा तदूर्ध्वम् द्विगुणं भवेत्।**
**गर्भविस्तार विस्तीर्णा शुकाजधैश्च विधीयते।।**
**तत्रिभागेन कर्तव्यः पञ्चभागेन वा पुनः।**
**निर्गमस्तु शुकाङ्मैश्च उच्छ्रायः शिखरार्द्धगः।।**
**चतुर्दाशिखरं कृत्वा त्रिभागे वैदिबन्धनम्।**
**चतुर्थे पुनरस्यैव कष्ठमामूल साधनम्।।**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**अथवापि समं वास्तुकृत्वा षोडश भागिकम्।**
**तस्यमध्ये चतुर्भागमादौ गर्भन्तु कारयेत्।।**
**भागद्वादशिकां भित्तिं ततश्च परिकल्पयेत्।**
**चतुर्थभागेन भित्तीनामुच्छ्रायः स्यात्प्रमाणतः।।**
**द्विगुणः शिखरोच्छायो भित्युच्छायाच्च मानतः।**
**शिखरार्द्धस्य चार्द्धन विधेयास्तु प्रदक्षिणाः।।**

**चतुर्दिक्षु तथा ज्ञेयो निर्गमस्तु तथा बुधैः।**
**पञ्चभागेन संभज्य गर्भमानं विचक्षणः।।**
**भागमेकं गृहीत्वा तु निर्गमं कल्पयेत् पुनः।**
**गर्भ सूत्रसयोभागादग्रतो मुखमण्डपः।।**
**एतत्सामान्यमुद्दिष्टं प्रासादस्य हिलक्षणम्।**
**लिंगमानमथे। वक्ष्ये पीठोलिंग समो भवेत्।।**
**द्विगुणेन भवेत् गर्भः समन्ताच्छौनक ध्रुवम्।।**
**तद्विधा च भवेत् भित्तिर्जङ्घा तद्विस्तार्धगा।।**[2]

अनेन गरूड़ पुराणस्याध्ययनेनेदं ज्ञायते यत् प्रासाद निर्माण विद्या अतीव प्राचीना आसीत्। पुराणकालतः प्रचलनमाना इयं प्राचीन शिल्पविद्या अध्यावधि पर्यन्तं व्यापक रूपेण प्रचलनमाना अस्ति। आयुधानि धनुर्दण्डान् पानं आसनं शैयाप्रमाणं गजवाजिनां गृहम् अरघट्टेक्षु यन्त्राणि युग यूप हलानि चवास्तुशांस्त्रस्याभिन्नमेकमङ्ङ्गमस्ति। पुराणेषु प्रासाद विषयिकी एका कथा प्रचलिता अस्ति प्राचीन काले सर्वे देवाः यज्ञादि क्रिया द्वारा जगदीश्वरमाहूतवन्तः। ततो जगदीश्वरः प्रसन्नो भूत्वा वरं दत्तवान्।

**भवत्प्रसाद दृष्टेश्च पूजा प्रासाद संज्ञिकाः।**
**वैराज्याद्याः समुत्पन्नाः सर्वाः प्रासादजातयः।।**

एतेषामवान्तर भेदं नीत्वा वैराज्यादि 588 पुष्पकादि 300 कैलासदि 500 मणिपुष्पादि 150 तथा त्रिविष्टपादि 350 भवन्ति।

अनेन वैराज्य पुष्प कैलास मणिपुष्प त्रिविष्टप इत्यादयाः। पञ्च प्रासादाः देवानां कामनया समुत्पन्नो जातः। पुनश्च दानवेन्द्रेण पूजां कृत्वा महोत्सवैः स्वस्तिकाः सर्वतोभद्रा वर्द्धमानस्तृतीयकाः सूत्र पद्या महापद्मा द्राविडकर्म चर्चितः प्रासादाः समुत्पन्नाः। एतेषु अवान्तर भेदेषु प्रायेके एकाद्वि त्रिच चतुः पञ्चाशतान्येकैक जन्मतः संख्या न्वार्द्धसहभेदेषु पूर्व देवैः कृतास्तथा। पञ्चशतानि संख्यकानि प्रासादाः संभूतः। बदा गन्धर्वैः पूजा कृताः तदा रूचको भव पद्ममाक्षौ मलयो वज्रक नाम्नः प्रासादाः अभवन्। एतेषु पञ्च प्रासादेषु रूचकादि षोडशप्रकारकाः भव विभव पद्ममाक्ष मालाघर, मलय मकरध्वज वज्रक स्वस्तिक तथा शंकु इत्यादयः 25 लतिनादि प्रासादाः संभूतः।

यदा वसुभिः पूजाकृता तदा वराटः पुष्पक श्रीपुञ्ज सर्वतोभद्र तथा सिंहादयाः पञ्चप्रासादाः संभूतः। एवं अवान्तर भेद सहितान् वराटादि प्रासादाः 112 संख्यकाः अभवन्।

यक्षैः यदा पूजा कृता तदा विमान, गरूड़ ध्वज विजय गंधमादन इत्यादयः पञ्चप्रासादः सम्भूतः। अवान्तर भेदेन विमानादि प्रासादः 103 संख्याकः भवन्ति। गरूड़ादि 104 ध्वजादि 105 विजयादि 106 गंधमादनादि 107 सर्वानाहत्य 525 संख्याकः भवन्ति।

यदा उरगैः पूजाकृताः तदा केसरीनंदन मंदार श्रीवृक्ष इन्द्रनील रत्नकूट नाम्नः पञ्च प्रासादाः अभवन्। एतेषु पञ्चप्रासादेषु अवान्तर भेदं नीत्वा प्रत्येकस्य 1250 भेदाः संभवन्।

विद्याधरैः यदा पूजा कृता तदा 118 संख्यकाः मिश्र प्रासादाः संभूताः। यदा भूपालैश्च पूजाकृता तदा भूमिजादि प्रासादाः समुत्पन्नो जातः। तेषामवान्तर भेदाः 625 संख्यकाः भवन्ति।यदा सोमेन पूजाकृता तदा विमान पुष्पकादि प्रासादाः समुत्पन्नाः। यदा गौर्या चौव महादेव्या पूजामारब्धः तदा वलभीति नारिसंज्ञकाः प्रासादः संभूतः।हरसिध्यादि देवीभिः यदा पूजाकृता तदा सिंहावलोकन नाम्नः प्रासादः संभूतः। काष्ठ निर्मितो अयं प्रासादाः दारुजः स्त्रीसंज्ञकोऽभूतः।

देव दैत्यादिभिः द्वारा प्रचलिता इयं पूजा आसादीनां चतुर्दश जातीया भवन्ति।

| **प्रासादानां प्रकारः** | **प्रासादानां संख्या** |
|---|---|
| 1. सुरैस्तु नागराः | 1888 |
| 2. दानवेन्द्रैः द्राविड़ाः | 500 |
| 3. गन्धर्वैः लतिनाः | 25 |
| 4. यक्षैः विमानादि | 525 |
| 5. विद्याधरैः मिश्रकादि | 118 |
| 6. वसुभिः वराटकादि | 112 |
| 7. नागैः सांधरादि | 125 |
| 8. राज्ञैः भूमिजादि | 625 |
| 9. सूर्यलोकेः विमान नागरच्छेदिभिः | 01 |
| 10. चन्द्रलोके विमानपुष्पक छंदादिभिः | 01 |
| 11. पार्वतीभिः वलभ्यादिः | 01 |
| 12. हरसिद्धयादिभिः सिंहावलोकनादिभिः | 01 |
| 13. व्यन्तवरावस्थित (पिशाचादि) फोसनादि | 01 |
| 14. नपुंसकादि | 01 |

मणिमुक्ता प्रवालैर्विभूषिताः सौवर्णैर्राजता प्रासादाः देवानां सततं प्रियाः। रीतिकास्ताम्रयुक्ताश्च प्रासादाः पिशाचोरगराक्षसाम् प्रियाः। पाताले पाषाणैः मण्डिताः स्फटिक युक्ताः प्रासादाः शुभकराः भवन्ति। प्रासादोऽयं नगराणां शोभा वर्द्धयति। देवानां निवासार्थ निर्मीयते। लोकानां पुरूषार्थ च तुष्टयस्य संसाधनं भवति। सुरयोषितां क्रीडनार्थं लोकानां मनोरञ्जनार्थञ्च भवति। गीतनृत्यैश्च वादित्रैः प्रक्षणीयैर्मनोहरैः नानाध्वजपताकैश्च तोरणैश्च प्रासादो विभूषितः भवति। मुख्यत्वेन शुद्धछंदेषु अष्टप्रासादाः परिगणिताः सन्ति। ते सन्ति नागराः प्राविड़ाः भूमिजाः लतिनाः सांधाराः विमानाद्याः मिश्रकाः पुष्पांकिताः येतेषां चर्चा अस्माभिः कृताः। एते चाष्टौ शुभाः ज्ञेयाः। देशानुसार प्रासाद, विधानेषुएते चाष्टौ प्रवर्तन्ते गंगातीरेषु सर्वदा अहिराज्येषु सांधाराः प्रवर्तन्ते च नागराः। कामरूगौड़बंगेषु सांधाराः लतिनोद्भवाः तुरकोदण्डहालेषु गंगोदधौविमानकाः इत्यादयाः प्रासादाः चौलदेशे नीलसंभव प्रदेशे मलयदेशे तथा च कान्यकुब्ज देशे वर्जिताः सन्ति। वैराटदेशे वैरागदेशे मिथिलाप्रदेशे कोकणे दक्षिणापथे नागराः द्राविड़ाः छंदाः वैराटाः भूमिजोन्द्रवाः लतिनाः सांधाराः मिश्रकाः विमानजाः इत्युक्ताः प्रासादाः शुभकराः सन्ति। उज्जैन्यां मालवदेशे कांच्यां कलिंजरे मगधदेशे अन्तरवेद्याच्च मथुराप्रदेशे हिमालय प्रदेशे दण्डकारण्य प्रदेशे लतिनाः नागराः सांधाराः भूमिजादि चतुः छंदाः प्रासादाः शुभकराः सन्ति। सौराष्ट्र गुर्जर ब्रह्मावर्त प्रदेशे काश्मीर, सिंधु खुरासाणे तेजोगक्षणकादिषु चतुः छंदाः प्रासादाः शुभकराः भवन्ति।

विमान नागरादि, विमान पुष्पकादि, सिंहावलोकनादि तथा फांसनादि रथारुहादि प्रासाद प्रकाराः प्रायः सर्वत्र समस्तदेशेषु प्रवर्तन्ते परन्तु भारते एतादृशानां प्रयोगः देशानुसारेण कुर्यात्।

नागरः पूर्वदेशे समुत्पन्नः द्राविड़ः कर्णाटेजातः व्यन्तरः पश्चिमे वेशर उत्तरापथे जातः। कलिंग कलिंगे देशे यामुनः सर्वत्र जानीमात्। एवं कमेण देशानुसारेण प्रासादानामुत्पत्तिर्जानीयाद्। तत्र नागरोविप्रज्ञातिः द्राविड़ क्षत्रिय ज्ञातिः व्यन्तरो नपुंसक ज्ञाति वेशरादि वैश्यज्ञाति युक्तो जानीयात्। नागरः श्वेत वर्णाभो द्राविड़ो रक्तवर्णकः व्यन्तरः पीतसंकाशो वेश हरित वर्णयुक्तः जानीयात्। नागरं सात्विकं ज्ञेयं द्राविड़ादि राजसंवेशरादि तामसं ज्ञेयं एते त्रयः ब्रह्मा विष्णु महेश रूपः प्रासादः कथितः। सात्विके देशे नागरादि राजस देशे द्राविड़ादि तामस देशे वेशरादि प्रासादानां निर्माणं कुर्यात्। नागरो प्रासादः विप्रः वेशरोवैश्यः द्राविणो नृपोज्ञेयः।

प्रासाददीनां निर्माणं नदीतटे सिद्धाश्रये तीर्थे पुरे ग्रामे गहरे, वापीवाटी तड़ागादि स्थाने सुरालये कर्तु शक्यते। नागराभिमुखाःनिर्मिताः प्रासादाः सुखकराः भवन्ति। गणेश कुवेर लक्ष्मी देवता यदि पुरे द्वारे विराजन्ते तर्हि सुखमेव जनयन्ति।

गुरूद्वारा निर्माणमपि प्रासादरचनायाः एकः प्रकारः।

**ज्ञात्वा लक्षण लक्ष्याणि गुरुमार्गानुसारतः।**
**प्रासादभवनादीनां सर्व ज्ञानमवाप्नुयात्।।**

गुरूद्वारा अपि प्रासादस्य एकः प्रकारः। गुरूद्वारा निर्माणाय लक्षणानि गुरूमार्गानुसारतः जानीयात्। येन गुरूद्वारा निर्माणं शुकरो भवेत्।

शुभलग्ने शुभनक्षत्रे पञ्चग्रहबलान्विते प्रासादादीनाम् निर्माणं कुर्यात्। दीपसूत्रध्रुवैक्यतः रात्रौ दिक्स्तधनं कुर्यात्। दिवसे समप्रदेशे शंकुना दिक्साधनं कुर्यात्। पूर्वोक्त विधिना भूमिपरीक्षणं भूमि संशोधनञ्च कुर्यात्। प्रासादस्य विनिर्माणे भूमिसंशोधनं पूर्वकं शल्यशोधनञ्च कुर्यात्। जलान्तिकं स्थितं शल्यं प्रासादे दोषकर्ता भवति। तस्मात्प्रासादिकी, भूमिं खनेद्यावज्जलान्तिकम् पश्चात् नागवास्तुं समालोक्य खातविधिं कुर्यात्।

एकहस्ते प्रासादे शिला चतुरंगुलाकुर्यात् यावद् दशहस्तकं भवेत् द्वयंगला वृद्धिं कुर्यात्। दशतः विंशति प्रर्यन्तं अंगुलमात्रं विंशति। तः चाशत प्रर्यन्तं अगुलि वृद्धिं कुर्यात्। अष्टांगुलोच्छ्रिता स्वस्था चतुरास्राकारान्विता शैलजे स्वस्थमानोक्ता इष्टकानां तदार्द्धता कुर्यात् कूर्मशिला उपरि प्रमाणेन प्रावाह मत्स्य मण्डूक मकर ग्रास संयुतानि चित्राणि उपस्थव्यानि प्रथमं जल प्रवाह द्वितीयम् मत्स्याकृतिः तृतीयम् मण्डूकाः चतुर्थम् मकराः प्ञ्चमे ग्रासमुखम् षष्ठे शंख सप्तमे सर्पाः अष्टमे कुंभा कृतिः नवमे मध्ये कूर्मेण भूषितानि चित्राणि लेखनीयानि।

**कूर्मो मध्यस्थले तु गर्भरचना वहूनेशिलायां जलम्।**
**याम्ये मीनमुखञ्च नैऋतदिशि स्थाप्यं तथार्दपुरम्।।**

वारुण्यां मकरञ्च वायुदिशि वैग्रासश्च सौम्येध्वनिः। नागं शंकरदिक्षु पूर्वविषये कुंभः शिला वहिनतः।। प्रासादस्य विनिर्माणे शिलायाः नामानि अपि वास्तुविदैः उक्तानि। तान्मते प्रासादे नवविधायाः शिलायाः उपयोगो भवति। तेषां नामानि निम्न लिखितानि सन्ति।

1. नन्दः
2. भद्रा
3. जय
4. रिक्तस्थानम्
5. अजिता
6. अपराजिता
7. शुक्लः
8. सौभागिनी

इत्यष्टौ शिलाः भवन्ति

तत्र एक हस्ते प्रासादे यावद् वृद्धिः भवेत् द्वयंगुला। शिलासप्तांगुला भवेत्। तथा पञ्चकरं पञ्चतः दशपर्यन्तं एकांगुला वृद्धिः पादानांगुला वृद्धिर्भवति। विंशति तः भवति। दशतः विंशति पर्यन्तं पञ्चाशत पर्यन्तं अर्द्धगुला वृद्धिर्भवति। एवं चतुरस्त्रा समा कार्या स्थूला वै चतुरंशतः शिला।

शिलाः कृत्वा शिलानामुपरि अग्निकोणात् समारभ्य स्वरूपाणि प्रकल्पनीयानि। अग्निकोणे शक्तिः दक्षिणे दण्डः नैऋत्ये खंगः पश्चिमे पाशः वायव्ये अंकुशः उत्तरे गदा ईशान्यां त्रिशूलं पूर्वे वज्रं प्रकल्पयेत्।

प्रासादस्य मान प्रमाणेन रक्तं श्यामं नीलं पाण्डुरं श्वेतवर्णकम् हरितंः शुक्लपीते च वस्त्राणि परिदापयेत्। पीठनिबंधन पूर्वकं पूर्व शिलां निवेशयेत्। जंघा च शिखरस्यैव कलशान्तिकम् वेदिका स्थापयेत्। शिलाधः उपपीठकम् समस्तं शिलोपरि स्थापयेत्। संपुटेषु तु अधः खाते निधिं कुंभान्नियोजयेत। शंखपद्यममहापद्यम मकराः कुन्द नालकौ नियोजयेत्। प्रासादस्य मान प्रमाणेन शिलां सज्जीकृत्य ततो अग्निकोणादारभ्य क्रमशः शिलायाः निबन्धनम् कार्यम्।

इशानाग्निकोणाद्वा शिलास्थाप्याः प्रदक्षिणाः। मध्ये कूर्मशिला पश्चाद्गीत बादित्त मंगलैः।। नंदा पूर्व प्रदातव्या शिलाः शेषाः प्रदक्षिणाः। मध्ये च धरणी स्थाप्या यथाकर्म प्रयत्नतः।।

ईशानकोणात् अथवा अग्निकोणात् प्रारभ्य अनुक्रमेण अष्टशिलाः स्थापनीयाः तत्पश्चात् मध्यभागे गीतानि वाद्येन संगीतेन सह आरभेत्। एताषु अष्ट शिलाषु पूर्वदिशायां नंदा नाम्नी शिलाः स्थापनीयाः शेष शिलायाः प्रदक्षिणां कृत्वा स्थापनीयाः पश्यतः पश्चात् मध्यभागे विधि अनुसारेण धरणी नाम्नी कूर्म शिला स्थापनीयानि।

शिलोर्वेषु न कदापि इष्टका दातव्या। कूर्म न्यासे शिलायाः स्थापने च वलिदानं विधि पूर्वकं दातव्यम्। वलिदाने घृत संयुतं नैवेद्यं दातव्यम्। दिक्पालेभ्यो यथोत्साहेन वलिं दद्यात्। शिल्पिनेदिव्य वस्त्रञ्च दद्यात्। ब्राह्मणानां भोजने नारिकेल फलं दक्षिणाञ्च दद्यात्।

प्रासादानामधिष्ठाने जगती निबन्धनं भवति। यथा नृपानामधिष्ठानं तस्य सिंहासनं भवति तथा हि प्रासादानामधिष्ठानं तस्य जगती भवति। प्रासादानां जगती चतुरस्त्रा तथा अष्टास्रा व वर्तुलाकार युक्ता कार्याः। आयताकार युक्ताऽपि प्रासादस्य जगती कारयितुं शक्यतेः यादृशः मूल प्रासादः भवेत् कारयितुं शक्यते। यादृशः मूल प्रासादः भवेत् तादृशी तस्य जगती अपि अपेक्षते। प्रासादे जगती भिन्न छंदा कदापि न कर्तव्या। जगती प्रायः पञ्चधा भवति ।

1. चतुरस्त्रा 2. आयत्ता 3. वृत्ता 4. वृत्तायता 5. अष्टात्रा।

चतुरस्त्रायाः नाम वीरभद्रा जगती अस्ति। आयतायाः नाम सुपताका अस्ति। पूर्णभद्रायाः नाम भद्रिका अष्टात्रायाः नाम जया अस्ति। अष्टात्रायाः अपरं नाम विजया स्वस्तिका च अस्ति। षोडशास्त्रायाः नाम अजिता द्वात्रिंशास्त्रा नाम अपराजिता अस्ति। प्रासादस्य गुण मानेन द्विगुणा, चतुर्गुणा कमात् पञ्चगुणा जगती करणीया। तदा सा जगती कमाद् ज्येष्ठ मध्य कनिष्ठ रूपेण विभजते। कनिष्ठे कनिष्ठा ज्येष्ठे ज्येष्ठा मध्ये च मध्यमा प्रासादे जगती कार्या। प्रासादात् गुणत्रयं चतुर्गुणं व पञ्चगुणं जगती कुर्यात् तदा सा जगती देवपुर नामाभिधानेन कीर्त्यते। तथा एक द्विवेद सहस्त्रैर्हस्तैः यदि जगती भवति तदा सा गजमन्दिरत्वेन उच्यते। कलाष्टवेद हस्तैः स्याज्जगती राजपुरं समम्।

मण्डपानुकमेणैव सपादांशेन सार्धतः द्विगुणा बाह्यतः कार्या। चतुः कोणैः तथा सूर्य कोणैः विंशतिकोणकैः अष्टाविंशति षट् त्रिंशत् कोणैः स्युः पञ्च फालनाः। एकहस्ते प्रासादे जगती तत्समोदया अर्थात् एकगज पर्यन्तम् भवेत्। द्विहस्ते हस्तसार्द्धञ्च त्रिहस्ते च द्विहस्तकम् एवं चतुर्हस्तोपरिष्टाच्च द्वादश हस्तकम् कुर्युः। प्रासादार्धप्रमाणेन ततः त्रिभागेन कुर्यात्। चतुर्विंशति पर्यन्तं सुलक्षणं कर्तव्यम्। जगतीनां समुच्चये पादेन चोच्छ्रयः कार्याः यावद् पञ्चाशतहस्तकम्। प्राज्ञः अष्टाविंशितिभिः पदैः विभागः कर्तव्यः। त्रिपदो जाड्यकुम्भश्च द्विपदा कर्णिका तथा पद्मपत्र समायुक्ता त्रिपदा सर पट्टिका। द्विपदं खुरकं कुर्यात् सप्तभागश्च कुंभकः कुर्यात्। त्रिपदे कलशः कुर्यात् ततः त्रिभागेन कपोतालिः कुर्यात् युगांशके पुष्पकंठो कुर्यात्। अष्टभिः पदैः पुष्पकः जाड्यकुम्भकः निर्गमश्च कुर्यात्। प्राच्यादिषु प्रदक्षिणाः तथा कर्णेषु च दिशांपालनां मूर्तिः निर्मीयात्।

चतुरशिल्पिनः प्रासादधारिणी शिला अति स्थूला सुविस्तीर्णा सुदृढ़ाकार्या। शिलोपरि भीटमपिकार्यम्। शिलोपरि भीटमेकहस्ते युगांगुलम् भवेत्। यावद् हस्तशतार्द्धकं परिमितं न गच्छेत् तावद् अर्द्धगुला वृद्धिः नैव कार्या। एकहस्ते प्रासादे वेदांगुलंभीटं कार्यम्। हस्तादि पञ्चपर्यन्तम् वृद्धिः एकम् एकमंगलम् कार्यम्। पञ्चोर्द्ध दशपर्यनतम् हस्ते पादोनमंगुलम्। दशोर्ध्व विंश पर्यन्तम् हस्तेर्धमंगलम् कुर्यात्।

न्यूनातिन्यूनं एक द्वित्रीणिभीटानि कार्याणि। भीटत्रयं कृत्वा तस्य नामानि कमशः मुक्तिकं पुष्पकं ह्रस्वं च धर्म यश प्राप्त्यर्थ कार्यम्। कर्णभद्रोपभद्राश्च रथोपरथकर्णिकाः भीटस्यापि तु इदं मानं तद् ऊर्ध्वत्वेन पौठे करणीयम्। एक हस्ते प्रासादे पीठं द्वादशांगुलम् कार्यम्। हस्तान पञ्च पर्यन्तम् स्मृता पत्रांगुला करे भवेत्।

पञ्चतः ऊर्ध्व दश पर्यन्तं यावत् वृद्धिः वेदांगुला कार्या। दशतः विंशति पर्यन्तं हस्ते चौव वृद्धिः अंगुलत्रया कार्या। प्रासादे पीठमान शुभदं सर्वतोभद्रं पद्यकंज वसुन्धरम् सिंहपीठम् व्योम गरूणम् हंसमेव इति नाम्नः करणीयम्। वृषभंनामपीठम् मेरूमाधारकारणेन भविष्यति। एवं छज्जिकायां सूर्य दिग्वसु भागैश्च गज वाजि नरः कमात् स्वस्य देवस्य वाहनम् कार्यम्। पीठमेव सर्वेषामाधाराः इति वास्तुशास्त्रकाराणां मतम् पीठहीनं सर्वथा प्रासाद भवनादिकम् विनश्येत्।

देवालयस्य प्रमाणं मूलनासिकातः ज्ञातव्यम्। रथोपरथनंदी च भद्रापभद्रमेव एते बाह्याः ज्ञेयाः निर्गमाः पीठादिकम् मण्डोवरस्य निर्माणार्थम् प्रथमतः षट् पर्यन्तम् आच्छादनं करणीयम्। तथाद्यच्छाद्यसंस्थाने द्वे जंघे तावन्मण्डोवरं प्रकीर्तिते। शेषे दश जंघापर्यन्तम् षड् विधं खेटछाद्यञ्च द्विभूम्योन्तरे सुने भरणिकोर्ध्वं भवेत् मन्त्री छाद्योर्वेऽपि च मञ्चिका कर्तव्या। यावद् पर्यन्तं द्वादश संख्यया न भवेत् तावत् जंघा न प्रदातव्या। भूमिकोच्छ्रये किञ्चिद् किञ्चिद् न्यूनं च कर्तव्यम्।

पीठयस्तावत् छाद्यान्त पर्यन्तम् वेदवेदेन्दु वत् (144) भागः कर्तव्यः। तत्रखुटकः पञ्चभागेषु कुम्भकः विंशतिभागेषु अष्टौ कलशः सार्द्धद्वयम् अन्तरालकम् अष्ट कपोतिका नवभगिका मञ्ची च कर्तव्या यदा जंघा पञ्चत्रिंशद् तदा तिथ्यांशैः अद्गमोभवेत् उद्गम् भागः 15 भरणी भागः अष्ट शिखट्टी भागः 10 कपोतालिः (पुष्पकंठ) भागः 8 अन्तराल भाग 2) छाद्य भागः 13 कर्तव्यः दशंभागो न विनिर्गमः।

खुरकः पञ्चभागः ऊर्ध्वः द्विभागः निर्गमः कर्तव्यः भागार्द्धान्तर पतञ्च कर्णः द्विभागिकः स्यात्। सार्द्धैकोभागं वापी स्कन्धश्च एकोभागः कणकोत्तमम् कुर्युः। पट्टिको भयशोभनम् तस्याग्रे करणीयम्। विंशति भागकोत्सेधं तद्वर्वे कुंभकं न्यसेत्। तस्य भागार्थः स्कंध पट्टः विधिकाऽपि कार्या। सुललितं वृत्ताकारं स्कंधमपि कुर्यात्। विचित्र पत्तवाकीर्ण चिप्पिका पद्यम्पत्रिका कार्या। प्राच्य मध्य अपशग्रेषु ब्रह्म विष्णु महेश्वराः त्रिसंध्या भद्र शोभायं चित्रपरिकरैर्वृत्तम् मुद्रापानी कमा स्तम्भिकायां तोरणं पञ्चमृणाल शोभायम् न्यसेत्। अष्टभावैः विभाजितः कुंभोध्वकलशः कार्यः। मध्यं चिप्पिकावृत्तं षड् भागसंयुतम् कार्यम्। तयोर्ध्वेचिप्पिकार्या पट्टबंधः नाना रत्नैः संकुलः कार्या। द्विसार्डान्तर पत्रञ्च पुष्पकैर्दिव्य विभूषितम् कार्यम्।

अष्टभागा कपोताली स्कंधपट्टिका भागार्धा कार्या। स्कंधोद्वय सपादश्च पादैका मुखपट्टिका कार्या कर्ण भागद्वयं कार्यम् सार्द्धद्वयोन्नतः स्कन्धः कार्यः। भागार्थः स्कंधपट्टः कर्तव्यः। मुखपट्टी च कर्तव्या चाधोऽग्रे तु गगारकाः। समताग्रे चतुरंगुलैः विधातव्यः ऊर्ध्वस्कंधो विधातव्यो दलगर्भसमुद्भवः। सम सुहाल शीर्षे ठवारिका कर्तव्या।

भागैर्नवभिः उनता मञ्चिका करणीया। सपादान्तर पत्रञ्च पादोनं कामरूपकम् भागपादेन पट्टिका द्वयभागिकः स्कंधश्च कर्तव्यः। मुखपट्टी भवेत्पादा सपादः कर्णः भवेत् सपादश्च स्कंधः भवेत्। सपादान्तर पत्रिका भवेत्। कणकं भाग सार्द्धनतु पादानिर्वाणपट्टिका कर्तव्या। कपोताल्याश्च सूत्रेण गगारकाः कर्तव्याः।

जंघास्तम्भैर्निगमाढ्या भ्रमणैर्लवना कमैः कार्या। तदूर्ध्व च पञ्चत्रिंशोन्नता जंघा कार्या। भ्रमनिर्वाणितैः स्तम्भैर्नासिको पांगफालनाः शुभाः कार्या। स्तम्भैः समस्त मूलनासासु गजैः सिंह व्यालैश्च मकरैः समलंग्रहता कार्या। कर्णेषु च अष्टदिग्पालाः प्राच्यादिशु प्रदक्षिणाः। नटेशं पश्चिमे भद्रे अंधकैः चण्ड्युक्तोत्तरे देवी दंष्ट्रानन सुशोभिताः सूत्रदेवाश्च कर्तव्याः। प्रतिरथे दिशाधिपाः वारिमार्गेषु मुनीन्द्राः प्रलीनास्तपशासने गवाक्षकांश्च भद्रेषु कुर्यात् निर्गम भूषितान्। पञ्चारभणकैः तिलकसंयुतैः ब्रह्मा विष्णु महादेवैः ईलिकाल वणैरयुतान स्तम्भैः गवाक्षकांश्च्व चित्रयेत्।

**सन्दर्भग्रन्थसूचीः**

1. अग्निपुराणम्
2. समराङ्णसूत्रधारः
3. मत्स्यपुराणम्
4. गरुडपुराणम्
5. वायुपुराणम्
6. बृहत्संहिता
7. बृहद्वास्तुमाला
8. मयमतम्
9. वास्तुसौख्यम्
10. अपराजितपृच्छा
11. शिल्प रत्नम्
12. देवालय चन्द्रिका
13. देवप्रासादवास्तु विधानम्